श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्र स्वामिना अनुगृहीतम्

# ॥ श्रीलक्ष्मीहयग्रीवसुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीहयग्रीवसुप्रभातम् ॥

करुणावरुणालयाम्बुजश्री -
    स्फुरणाहंकृतिहारिलोचनश्रीः।
चरणाब्जनतार्तिभारहारिं -
    स्तव भूयात्तुरगास्य सुप्रभातम् ॥ 1 ॥

पुरःप्रबुद्धाम्बुधिराजकन्या -
    मुखाब्जनिश्वासमिवानुकुर्वन्।
मरुत्सुगन्धिः प्रतिवाति मन्दं
    हयाननस्तात्तव सुप्रभातम् ॥ 2 ॥

त्वद्दीप्त्या प्रविमलया जितः किलासा -
    वाहोस्वित्तव दयितामुखाम्बुजेन।
पाश्चात्ये पतति पयोनिधौ सुधांशु -
    र्भूयात्ते सपदि हयास्य सुप्रभातम् ॥ 3 ॥

वरदानकृतिन् स्मरदार्ततर -
    द्विरदाघहृतिस्फुरदादरण।
इति सन्मतयो यतयः प्रवद -
    न्त्यधुना मधुनाशन जागृहि भोः ॥ 4 ॥

समर्चने ते कृतकौतुकेन
सज्जीकृतं शोणमणीन्द्रपीठम्।

हंसेन किं सान्ध्यमहो विभाति
हयास्य भूयात्तव सुप्रभातम्॥ **5**॥

हरिर्हरिर्हरिरिति मञ्जुभाषितं
    द्विजावळेस्सपदि निशम्य कौतुकात्।
द्विजव्रजोऽप्यनुवदतीव कूजितै -
    र्हयाननानघगुण जागृहि प्रभो॥ **6**॥

प्राचीं वधूं सपदि मित्रकरग्रहार्थं
    सन्ध्यावधूस्स्वरुचिकुङ्कुमपङ्कसान्द्रैः।
प्रालेयमङ्गलजलैरभिषिञ्चतीव
    श्रीमन् हयास्य भवतात्तव सुप्रभातम्॥ **7**॥

कुमुदवनं विमुच्य नवपङ्कजषण्डमिमाः
    सपदि समाश्रयन्ति मुदिता भ्रमरावळयः।
भुवि निखिलोऽपि चाश्रयति सश्रियमेव जनो
    हयवदनाद्य जागृहि हरे करुणैकनिधे॥ **8**॥

फुल्लत्पङ्कजरत्नपात्रनिवहानासाद्य हृद्यश्रियः
    सौगन्ध्याढ्यमरन्ददिव्यसलिलैरापूरितानादरात्।
हंसास्त्वामिव पूजयन्ति विरुतव्याजात्पठन्तो मनून्
    सुस्नातास्सरसीषु वाहमुख ते सुप्रातरस्तु प्रभो॥ **9**॥

उद्यलन्मधुकरौघमञ्जुलं
    पद्ममुल्लसति पूजनाय ते।
धूपपात्रमिव हंससज्जितं
    सुप्रभातमिह ते हयानन॥ **10**॥

इन्दीवराणामिव कान्तिरद्य
    मन्दीभवन्ती व्यपयातु निद्रा।
फुल्लत्विदं पद्ममिवाक्षियुग्मं
    हयास्य ते संप्रति सुप्रभातम्॥ **11**॥

एते वेत्रहतित्रुटत्पटुमहाकोटीरकोटीमणि -
    श्रेणीभिस्तव मन्दिरस्य ददतो द्वाराय नीराजनम्।
काङ्क्षन्ति प्रतिबोधकालमिह ते सर्वेऽपि लोकाधिपाः
    तानेतान् करुणावलोकनलवैर्धन्यान्विधेहि प्रभो॥ **12**॥

अक्षीणे मयि तिष्ठ किं विहरसे संक्षीयमाणे मुहु -
    र्बिम्बेऽस्मिन्निति देवदेव नितरां त्वत्प्रार्थनायागतम्।
चान्द्रंबिम्बमिदं वदन्ति हि परं मोदार्पणं दर्पणं
    दृष्टिं न्यस्य कृपानिधेऽत्र भगवन् प्राबोधिकीं श्रीपते॥ **13**॥

निद्राशेषकषायितैस्सुललितैरुद्यद्दयाप्यायितै -
    र्दिव्यापाङ्गझरैस्त्वदर्चनकृते द्वार्यत्र बद्धाञ्जलीन्।
आचार्यान्निगमान्तदेशिकमुखानाधत्स्व सुस्नापितान्
    सुप्रातं तुरगास्य तेऽस्तु करुणासिन्धो दिनं श्रीपते॥ **14**॥

इदं कुम्भद्वन्द्वं घुसृणमसृणस्मेरसलिलं
    प्रतीहारे लक्ष्मीस्तनयुगमनोहारि लसति।
इयं गौस्सद्वत्सा परिजनसमूहोऽपि निभृतो
    दिनं सुप्रातं ते भवतु करुणाब्धे हयमुख॥ **15**॥

रविमण्डलीमिदानीमुदयमहीभृत्तवाभिषेकार्थम्।
कनककलशीमिव वहत्यस्तु हयग्रीव सुप्रभातं ते॥ **16**॥

अनुचित इव सेवने त्वदीये
    प्रमदभरादिह पञ्चमं विहाय।
विदधति किल वैणिकाश्च गानं
    हयवदनाद्य तवास्तु सुप्रभातम्॥ **17**॥

पिकनिकरमदविधूननगानमनोहरमुदारसुकुमारम्।
धन्यं कन्याद्वन्द्वं त्वां नीराजयति जागृहि हयास्य॥ **18**॥

काहळडिण्डिममण्डलमर्दलपणवाद्यहृद्यवाद्यानाम्।
संस्पर्ध एव निनदा जृंभन्ते तुरगवदन बुध्यस्व॥ **19**॥

तव तनुरुचिसाधर्म्यात्संहृष्टे नर्तनं किलातनुतः।
द्वारभुवि चामरे द्वे हयवदन तवास्तु सुप्रभातमिह॥ **20**॥

त्वत्पादाम्भोजयुग्मं परिचरितुमना मूर्ध्नि बद्धाञ्जलिस्सन्
    श्रीकृष्णब्रह्मतन्त्राग्रिमपदकलिजित्संयमी त्वां स्तवीति।
त्वत्सेवायै समुद्यन्निरवधिकमहानन्दथुस्तिष्ठतीह
    श्रीमान्कृष्णावनीन्द्रो हयवदन तव श्रीश सुप्रातरस्तु॥ **21**॥

जय जय नित्यसूक्तिललनामणिमौळिमणे
    जय जय भक्तसंहतिभवाब्धिमहातरणे।
जय जय वेदमौळिगुरुभाग्यदयाजलधे
    जय जय वाजिवक्त्र परकालयतीन्द्रनिधे॥ **22**॥

॥ इति श्रीलक्ष्मीहयग्रीवसुप्रभातं समाप्तम्॥